

# शारदा संस्कृतम्

# 6

## अखिल-ब्रह्माण्डे संस्कृतम्

# शारदा संस्कृतम्

## भाग - 6
## ( कक्षा षष्ठी )


### लेखक-मण्डल

**जगन्नाथ शर्मा**
अध्यक्ष - ग्रामीण शिक्षा विकास समिति, हरियाणा

**उपेन्द्र कुमार शास्त्री**
प्रधानाचार्य एवं शिक्षा प्रमुख, दिल्ली
उत्तरक्षेत्र संस्कृत संयोजक

**नारायण सिंह**
प्रधानाचार्य, गीता निकेतन आ॰ वि॰, कुरुक्षेत्र
हरियाणा प्रांत संस्कृत संयोजक

**नरेन्द्र पाल**
आचार्य, ल॰ म॰ स॰ बा॰ मं॰ वसन्त विहार
दिल्ली प्रांत संस्कृत संयोजक

**तिरिवीधि साम्ब शिव राव**
आचार्य, स॰ ध॰ स॰ बा॰ मन्दिर,
पंजाबी बाग, दिल्ली

**विकास शर्मा**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**सुरेन्द्र कुमार**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**भूपेन्द्र शर्मा**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**डॉ॰ अमित धीमान**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**ज्योति प्रसाद**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र



## विद्या भारती उत्तर क्षेत्र
नारायण भवन, गीता निकेतन परिसर, कुरुक्षेत्र -136118
दूरभाष : 01744-259941 E-mail : vbukkkr@yahoo.co.in

# प्राक्कथनम्

संसारस्य प्राचीनतमा, श्रेष्ठा, वैज्ञानिकी भाषा संस्कृतम् अनेकासां भाषाणां जननी अस्ति। सङ्गणकस्य कृते सर्वाधिका उपयुक्ता भाषा नूनमेव संस्कृतम्। आधुनिके युगे भविष्यस्य नवमसन्ततेः सङ्गणकस्य (9th generation computer) उत्पादनं संस्कृताधारितम् एव भविष्यति। अत एव वयं वक्तुं शक्नुमः यत् एषा भाषा न केवलं प्राचीनतमा भाषा अपितु आधुनिकी भाषापि अस्ति। उच्यते हि सम्प्रति यत् **'संस्कृतं पठ, आधुनिको भव।'**

एकस्याः आख्यायाः अनुसारेण संस्कृतस्य प्रत्यक्षः अप्रत्यक्षश्च प्रभावः अखिलविश्वस्य प्रायः 97% भाषाणामुपरि वर्तते। उपर्युक्तकथनेन स्पष्टमेव यत् एषा भाषा सार्वदैशिकी भाषा। पुनः एषा भाषा जनभाषा भवतु, एतस्य कृते मिलित्वा प्रयत्नं कुर्मो वयम्।

बुद्धेः विकासाय संस्कृतमावश्यकम्। विद्या भारती एतां भाषाम् आधारभूतविषयरूपेण मानयति। अस्माकं विद्यालयेषु द्वितीया-कक्षातः संस्कृतस्य अध्यापनं प्रारभते। अस्य कृते बहुभ्यः दिनेभ्यः प्रयासः प्रचलति स्म यत् उत्तरक्षेत्रस्य संस्कृतस्यापि स्वपुस्तकं भवेत्। अस्मिन्नेव क्रमे गतवर्षे द्वितीयातः पञ्चमीकक्षा-पर्यन्तं संस्कृतपाठ्यपुस्तकानां लेखनम् अभवत्। सम्प्रति षष्ठीतः अष्टमीकक्षा-पर्यन्तं संस्कृतपाठ्यपुस्तकानि भवतां सुधीजनानां पुरतः वर्तन्ते।

कस्याः अपि भाषायाः चत्वारि कौशलानि वर्तन्ते - श्रवणम्, भाषणम्, पठनं लेखनञ्च। अतः चतुर्णां कौशलानां विकासाय अस्माकं सर्वं कार्यं भवेत्। कक्षायां बहुविध-शिक्षणोपकरणानां सहायताभिः अध्यापनं भवेत्। कक्षासु प्रत्यक्षविधिना, विभिन्नवस्तूनां प्रदर्शनमाध्यमेन, स्फोरक-पत्राणाम् उपयोगेन, प्रश्नोत्तर-माध्यमेन, वार्तालापैः, सम्भाषणमाध्यमेन निरन्तरम् अध्यापनं भवेत्, येन छात्राः संस्कृतसम्भाषणे दक्षाः भवेयुः। अपि च कक्षासु अध्यापनं गतिविध्याधारितं छात्रकेन्द्रितञ्च भवेत् । आचार्यः प्रत्येकं पाठस्य स्वसुविधानुसारेण 'पॉवर पॉईंट' प्रदर्शनस्य (PPT) स्तरानुसारं सम्यग्रूपेण निर्माणं कृत्वा अध्यापनं कारयेत् ।

समये-समये संस्कृतवस्तु-प्रदर्शनी, सज्जपट्टे संस्कृतलेख-प्रदर्शनम्, कक्षाकार्यप्रदर्शनाय समुचिता व्यवस्था, भित्तिलेखः, सम्भाषणप्रतियोगिता, संस्कृतगीतगायनम्, श्लोकगायनम्, सुभाषितलेखन-प्रतियोगिता, संस्कृतसुलेख-प्रतियोगिता, सम्भाषण-प्रतियोगिता, गीतापाठ-प्रतियोगिता, प्रश्नमञ्च-प्रतियोगिता चादयः स्वव्यवस्थानुसारम् अवश्यमेव कारयेत्। विद्यालये संस्कृतमय-वातावरणस्य निर्माणार्थं संस्कृताचार्यैः सदैव प्रयत्नो विधेयः।

बहुविधप्रयासेन संस्कृतं संस्कृतमाध्यमेन अध्यापनार्थं सम्भाषणाधारेण सरलभाषया च प्रस्तुतमिदं पुस्तकं भवतां सम्मुखम् अस्ति। षष्ठीतः अष्टमीपर्यन्तं संस्कृत-पुस्तकस्य कृते क्षेत्रस्य एषः प्रथमः प्रयासः अस्ति। अत एव त्रुटेः सम्भावना तु वर्तते एव। भवादृशान् सुधीजनान् निवेदयामः यत् आगामि-संस्करणस्य कृते प्रस्तुतपुस्तक-विषयकस्वविचारान् प्रेषयन्तु भवन्तः। भवतां सुधीजनानां विचाराः नूनमेव आगामिसंस्करणस्य कृते उपयोगिनः भविष्यन्ति।

पुस्तकनिर्माणे विद्याभारत्याः अधिकारिणां महत् योगदानं प्राप्तम्। तथैव सुन्दरचित्राणां द्वारा पुस्तकस्य आकर्षणं वर्धितवन्तौ गीतानिकेतनविद्यालयस्य कलाचार्यौ नितेशकुमारः सुरेन्द्रसिंहः च। पुस्तकस्य सर्वं टङ्कणकार्यं महता हर्षेण कृतवान् सत्येन्द्रः। एतेभ्यः सर्वेभ्यः सादरं कृतज्ञताम् अर्पयामि।

**शृणुत संस्कृतम् ! वदत संस्कृतम् !! पठत संस्कृतम् !!! लिखत संस्कृतम् !!!!**
**लसतु च संस्कृतं गृहे-गृहे च पुनरपि।**
**जयतु संस्कृतम्। जयतु भारतम्।**

**विदुषां पदकिङ्करः**
**उपेन्द्र-कुमार-शास्त्री**
**उत्तरक्षेत्र-संस्कृत-संयोजकः**

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| | | मङ्गलाचरणम् | 04 |
| 01. | प्रथमः पाठः | एहि स्मरामः | 05 |
| 02. | द्वितीयः पाठः | पद-परिचयः | 08 |
| 03. | तृतीयः पाठः | क्रियापद-परिचयः | 11 |
| 04. | चतुर्थः पाठः | सर्वे सन्तु निरामयाः | 14 |
| 05. | पञ्चमः पाठः | गृध्रमार्जारयोः कथा | 17 |
| 06. | षष्ठः पाठः | दीपोत्सवः | 20 |
| 07. | सप्तमः पाठः | सुभाषितानि | 23 |
| 08. | अष्टमः पाठः | स्वामी विवेकानन्दः | 26 |
| 09. | नवमः पाठः | स्वर्गतुल्यं जम्मू-काश्मीरम् | 29 |
| 10. | दशमः पाठः | सूक्तयः | 32 |
| 11. | एकादशः पाठः | वृक्षाः सत्पुरुषा इव | 35 |
| 12. | द्वादशः पाठः | बुद्धेः चातुर्यम् | 39 |
| 13. | त्रयोदशः पाठः | सन्मैत्री सुदुर्लभा | 43 |
| 14. | चतुर्दशः पाठः | मनसा सततं स्मरणीयम् | 47 |
| | | परिशिष्टम् | 48 |

# मङ्गलाचरणम्




**ओ३म् विश्वानि देव सवितर्दुरितानि परासुव ।**
**यद्भद्रं तन्न आसुव ॥**

**भावार्थः**

हे सब सुखों के दाता, ज्ञान के प्रकाशक, सकल जगत् के उत्पत्तिकर्त्ता एवं समग्र ऐश्वर्य युक्त परमेश्वर! आप हमारे सम्पूर्ण दुर्गुणों, दुर्व्यसनों और दुःखों को दूर कर दीजिए और जो कल्याणकारक गुण, कर्म, स्वभाव और पदार्थ हैं, उन्हें हमें भली भाँति प्राप्त कराइए ।

प्रथमः पाठः

# एहि स्मरामः

★ स्वराणां भेदत्रयम् ( संयुक्तस्वरोऽपि दीर्घ एव मन्यते )

**स्वरः**

(i) ह्रस्वः
अ इ उ ऋ लृ

(ii) दीर्घः

( अ ) दीर्घः
आ ई ऊ ॠ
अ + अ = आ, इ + इ = ई
उ + उ = ऊ, ऋ + ऋ = ॠ

( आ ) संयुक्तः
ए ऐ ओ औ
अ + इ = ए, अ + ए = ऐ
अ + उ = ओ, अ + ओ = औ

(iii) प्लुतः
आ३, ई३, ऊ३,
ए३, ऐ३, ओ३, औ३,

**अयोगवाहौ ➔**

(i) **अनुस्वारः** ( ं ) अं – हंसः, कंसः, संस्कृतिः, संस्कृतम्, संस्कारः।

(ii) **विसर्गः** ( : ) अः – रामः, देवः, लताः, मुनिः, साधुः।

★ मुख्यरूपेण व्यञ्जनानाम् अपि भेदत्रयम् – **स्पर्शः, अन्तःस्थः ऊष्मः च**

**( क ) स्पर्शाः**

| | | | | | | |
|---|---|---|---|---|---|---|
| (i) | कवर्गः | क् | ख् | ग् | घ् | ङ् |
| (ii) | चवर्गः | च् | छ् | ज् | झ् | ञ् |
| (iii) | टवर्गः | ट् | ठ् | ड् | ढ् | ण् |
| (iv) | तवर्गः | त् | थ् | द् | ध् | न् |
| (v) | पवर्गः | प् | फ् | ब् | भ् | म् |

**( ख ) अन्तःस्थाः** य् र् ल् व्

**( ग ) ऊष्माः** श् ष् स् ह्

**आलोकः** – सर्वे व्यञ्जनवर्णाः मूलरूपेण हलन्ताः ( ् ) एव भवन्ति, परं यदा व्यञ्जनेन सह स्वरस्य मेलनं भवति तदा हलन्तस्य ( ् ) चिह्नम् अपगच्छति । **यथा** – क् + अ = क, य् + अ = य, श् + अ = श, आदयः।

**मुख्याः संयुक्त-व्यञ्जन-वर्णाः** – यदा द्वयोः व्यञ्जनवर्णयोः मेलनम् क्रियते तदा संयुक्त–व्यञ्जन–वर्णः भवति ।

**यथा** –

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (i) | क्ष | – | क् + ष् + अ | = | क्ष | – | क्षमा, क्षणिकः, क्षयः, क्षत्रपतिः, आदयः |
| (ii) | त्र | – | त् + र् + अ | = | त्र | – | त्रस्तः, त्रिकोणः, त्रयोदशी, त्राता, आदयः |
| (iii) | ज्ञ | – | ज् + ञ् + अ | = | ज्ञ | – | ज्ञानम्, ज्ञातः, ज्ञानी, आज्ञा, विज्ञानम् आदयः |
| (iv) | श्र | – | श् + र् + अ | = | श्र | – | श्रमः, श्रवणः, श्रमिकः, श्रद्धा, आदयः |
| (v) | द्य | – | द् + य् + अ | = | द्य | – | अद्य, आद्यः, उद्यमः, विद्यालयः, आदयः |

(vi) स्र – स् + र् + अ = स्र – सहस्र:, अजस्र:, स्रोत:, आदय:

(vii) स्त्र – स् + त् + र् + अ = स्त्र – शस्त्र:, शास्त्रम्, आदय:

**एवमेव – ङ्ग, द्ध, द्म, प्र, ब्र, ह्ण, ह्न, ह्म, ह्य, ह्र, ह्ल, ह्व**

| | | |
|---|---|---|
| ङ्ग = ङ् + ग् + अ | द्ध = द् + ध् + अ | द्म = द् + म् + अ |
| प्र = प् + र् + अ | ब्र = ब् + र् + अ | ह्ण = ह् + ण् + अ |
| ह्न = ह् + न् + अ | ह्म = ह् + म् + अ | ह्य = ह् + य् + अ |
| ह्र = ह् + र् + अ | ह्ल = ह् + ल् + अ | ह्व = ह् + व् + अ |

## अभ्यासकार्याणि

**1. मञ्जूषातः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत –**

मञ्जूषा – चत्वारि, पञ्चविंशतिः, त्रयः, अष्ट, पञ्च

(क) ह्रस्व-स्वराः ............................. सन्ति ।

(ख) व्यञ्जनस्य ............................. भेदाः सन्ति ।

(ग) स्पर्श-व्यञ्जनानि ............................. सन्ति ।

(घ) दीर्घस्वराः ............................. सन्ति ।

(ङ) अन्तःस्थ-व्यञ्जनानि ............................. सन्ति ।

**2. मञ्जूषातः उचितस्वरान् चित्वा रेलयानं पूरयत –**

मञ्जूषा – इ, ओ, उ, ए, अ, ई, ऐ, औ, आ, ऊ, ऋ, लृ, ॠ




**3. घटात् वर्णान् चित्वा व्यञ्जनानां भेदानुसारं वृत्ते निर्दिष्टस्थाने पृथक्-पृथक् लिखत –**






4. अधोलिखित-वर्णविन्यासे सत्यस्य समक्षम् 'आम्' असत्यस्य समक्षं च 'न' इति लिखत –

(क) स्र = स् + र् + अ ( )

(ख) क्ष = क् + श् + अ ( )

(ग) द्य = द् + य् + अ ( )

(घ) ज्ञ = ग् + य् + अ ( )

(ङ) ह्म = ह् + म् + अ ( )

5. वर्णानां भेदानुसारं वायुगोलकात् समुचितं वर्णं चित्वा कमलपुष्पे निर्दिष्टस्थाने लिखत ।







6. निम्नलिखित-पदेषु संयुक्त-वर्णान् रेखाङ्कितं कुरुत।

यथा – प्रह्लादः हिरण्यकशिपोः पुत्रः आसीत्।

(क) ब्रह्मदेवः सृष्टेः निर्माणम् अकरोत्।

(ख) सहस्रांशुः पूर्वदिशि उदेति।

(ग) अद्य क्षत्रपतिः श्रमिकं क्षाम्यति।

(घ) श्रद्धावान् लभते ज्ञानम्।

आचार्याय – पुस्तकेऽस्मिन् आगतानां संयुक्ताक्षरपदानां वाक्यानां वा एकत्र सङ्ग्रहं कृत्वा तेषां च 'पी॰ पी॰ टी॰' निर्माणं करोतु। अनन्तरं छात्राणाम् अवबोधनं कारयतु, संयुक्ताक्षराणाम् अभ्यासं च कारयतु।

# द्वितीयः पाठः

## पद-परिचयः



सैनिकः
सैनिकः रक्षति।



कृषकः
कृषकः कर्षति।



चिकित्सकः
एषः चिकित्सकः अस्ति।




शिक्षकः
शिक्षकः पाठयति।



बालकः
बालकः हसति।



शशकः
एषः शशकः अस्ति।



श्वानः
श्वानः भषति।



उष्ट्रः
उष्ट्रः चलति।



वृषभः
एषः वृषभः अस्ति।



व्याघ्रः
एषः व्याघ्रः अस्ति।



मयूरः
मयूरः नृत्यति।



बकः
बकः श्वेतः अस्ति।



कपोतः
एषः कपोतः अस्ति।



काकः
काकः कृष्णः अस्ति।



कोकिलः
कोकिलः गायति।



बालिका
एषा बालिका हसति।




शिक्षिका
शिक्षिका पाठयति।



अम्बा
अम्बा पुत्रीं लालयति।



अजा
एषा अजा अस्ति।



मक्षिका
एषा मक्षिका अस्ति।



द्विचक्रिका
एषा द्विचक्रिका अस्ति।



मुद्रिका
एषा मुद्रिका अस्ति।



उत्पीठिका
एषा उत्पीठिका अस्ति।



आसन्दिका
एषा आसन्दिका अस्ति।



कलिका
एषा कमलकलिका अस्ति।


वर्तिका
वर्तिका श्वेता अस्ति।


चटका
एषा चटका अस्ति।


सारिका
सारिका कीटं खादति।


पिपीलिका
पिपीलिका गच्छति।


गृहगोधिका
गृहगोधिका चलति।


पत्रम्
एतत् पत्रम् अस्ति।


पुष्पम्
पुष्पं पाटलम् अस्ति।



पुस्तकम्
इदम् ऋग्वेदस्य पुस्तकम्।


चक्रम्
एतत् चक्रम् अस्ति।


पादकन्दुकम्
एतत् पादकन्दुकम् अस्ति।


आम्रम्
आम्रं पीतवर्णम् अस्ति।


सेवफलम्
सेवफलं स्वादिष्टं भवति।


दाडिमम्
दाडिमं रक्तम् अस्ति।


तारबुजम्
तारबुजं मम प्रियम्।


जम्बीरम्
जम्बीरं रसयुक्तम् अस्ति।


भारवाहनम्
भारवाहनं मार्गे अस्ति।


रेलयानम्
रेलयानं स्थानके अस्ति।


पाटलम्
पाटलं सुगन्धितं भवति।


चम्पकम्
चम्पकं श्वेतम् अस्ति।


उत्पलम्
उत्पलं जले भवति।


मुनिः
मुनिः आशीषं ददाति।


गुरुः
एषः जगद्गुरुः अस्ति।


लेखनी
एषा लेखनी अस्ति।


नदी
एषा नदी वहति।


धेनुः
धेनुः दुग्धं ददाति।

# अभ्यासकार्याणि

1. **उचितैः पदैः सह मेलनं कुरुत।**

(क)

| पदानि | चित्राणि |
| --- | --- |
| उत्पीठिका |  |
| कोकिलः |  |
| तारबुजम् |  |
| लेखनी |  |
| पत्रम् |  |
| वर्तिका |  |

(ख)

| पदानि | चित्राणि |
| --- | --- |
| बकः |  |
| आसन्दिका |  |
| कृषकः |  |
| मक्षिका |  |
| उत्पलम् |  |
| मुनिः |  |

2. **कः/का किं करोति? मञ्जूषायाः सहायतया लिखत।**

मञ्जूषा – भषति, आशीषं ददाति, पाठयति, गच्छति, चलति, खादति

(क) पिपीलिका ........................ । (ख) सारिका ........................ । (ग) मुनिः ........................ ।

(घ) शिक्षिका ........................ । (ङ) उष्ट्रः ........................ । (च) श्वानः ........................ ।

3. **मञ्जूषायाः सहायतया उचितेन पदेन रिक्तस्थानं पूरयत।**

मञ्जूषा – एषः, एषा, कृष्णः, पाटलं, चम्पकम्, एषा

(क) .................................. अजा अस्ति। (ख) .................................. कपोतः अस्ति।

(ग) काकः .................................. अस्ति। (घ) .................................. मुद्रिका अस्ति।

(ङ) .................................. सुगन्धितं भवति। (च) .................................. श्वेतम् अस्ति।

4. **चित्रं दृष्ट्वा तस्य अधः एकम् एकं लघुवाक्यं लिखत।**


..................................


..................................


..................................


..................................

5. **उदाहणानुसारं वर्णविन्यासं कुरुत।**

उदाहरणम् – **कृष्णः** = क् + ऋ + ष् + ण् + अः +

(क) मुद्रिका = .......................................... । (ख) द्विचक्रिका = .................................................................. ।